Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 6 | ISSN : 2582-0095

# शैक्षिकमनोविज्ञाने अधिगमविधिषु निरीक्षणविधेः महत्वम्

डॉ. दत्तहरि बेहेरा
सहाध्यापकः,शिक्षाशास्त्रविभागः, श्रीजगन्नाथसंस्कृतविश्वविद्यालयः, पुरी।

**Article Info**
Volume 5, Issue 5
Page Number : 129-132

**Publication Issue :**
September-October-2022

**Article History**
Accepted : 01 Sep 2022
Published : 15 Sep 2022

**शोधसारांशः-** "शिक्षा घ्राणं तु वेदस्य" अर्थात् वेदरूपीपुरुषस्य घ्राणः इतीयमुपमा प्रदता। यद्यपि वेदाङ्गदृष्टौ अक्षराणां शब्दानां च विशेषज्ञानप्राप्तिः शिक्षा भवति। यस्य पुष्टिः "एकः शब्द सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्त स्वर्गे लोके च कामदुग्धा भवति"। एतदर्थं शिक्षा एकः वैदिकशब्दः। यस्य सर्वप्रथमप्रयोगः ऋग्वेदेषु अभवत्। "शिक्ष विद्योपादाने" इति धातोः टाप् प्रत्ययात् शिक्षा इति शब्दः निष्पन्नः। तदनुसारं शिक्षयते उपादीयते विद्या यया सा शिक्षा। अर्थात् येन विद्या उपार्जनं क्रियते, सा अज्ञानरूपि बन्धनात् मुक्तिप्रदात्री भवति। अधिगम प्रदानस्यापेक्षया स्वतः अधिगमस्य (Self Learning) योग्यतोपरि बलं दीयते। तदर्थं प्रत्येकं बालकस्य शिक्षणाय वैयक्तिकावधानं परमावश्यकम्। व्यक्तिगतशिक्षणं शिक्षामनोविज्ञानेनैव सम्भवति। शिक्षायाः उद्देश्यमस्ति यत् बालके सक्रियतया जन्मजातशक्तीनां विकासकरणमेव। अतएव शिक्षाप्रदानस्य प्रक्रिया अपि जटिला सञ्जाता। अतः एतादृश्यां परिस्थितौ अध्यापकानां कर्तव्यं भवति यत् ते बालकस्य शारीरिक - मानसिक - योग्यता - रुचिनामध्ययनं कृत्वा तस्य क्षमतानां योग्यतानाञ्चानुरूपेण शिक्षयेयुः। मानवीयव्यवहारं परिशीलयति मनोविज्ञानशास्त्रम् । शिक्षा व्यवहारस्य विपरिणाम सम्पादने महत्वपूर्णं साधनं भवति । अतः अनयोर्मध्ये अत्यन्त निकटतमः सम्वन्धः वर्त्तते। बालमनोविज्ञानं विना अध्यापकैः स्वीय कार्यं सुष्ठु सम्पादयितुं न शक्यते । स्वाभिलषितरीत्या छात्रेषु व्यवहारसंपादनाय मनोविज्ञानस्य ज्ञानमनिवार्यं भवति। मनोविज्ञान माध्यमेन अधिगमःसम्भवति। अधिगम निमित्तं नैके विधयः वर्तन्ते,तेषु निरीक्षणविधिःअन्यतमः। निरीक्षणस्य परिस्थितिः, प्रक्रमः आवश्यकोपकरणानाम् आधारेण विविधपद्धतयः समुद्भूताः। यथा - काचित् व्यक्तिः स्वव्यवहारस्य निरीक्षणं स्वयं करोति चेत् आत्मावलोकनम् इति कथ्यते। काचित् व्यक्तिः अन्यस्य निरीक्षणं करोति चेत् निरीक्षणपद्धतिः इत्युच्यते। एतस्य शोधसारस्य वर्णनं शोधपत्रे करिष्यते।

**मुख्यशब्दाः-** शैक्षिकमनोविज्ञानः, अधिगमविधिः, निरीक्षणविधिः।

"इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः" । अनेन वेदार्थेषु प्रतिपाद्यविषयाणाम् अवबोधनार्थं सायणाचार्यः निर्देशयति यत् इष्ट-श्रेयसः प्राप्तिः तथा अनिष्टस्य परिहारार्थमलौकिकोपायः यः ज्ञापयति सः वेदः। वेदाङ्गेषु शिक्षायाः वैशिष्ट्यं वर्तते अतः "शिक्षा घ्राणं तु वेदस्य" अर्थात् वेदरूपीपुरुषस्य घ्राणः इतीयमुपमा प्रदता । यद्यपि वेदाङ्गदृष्टौ अक्षराणां शब्दानां च विशेषज्ञानप्राप्तिः शिक्षा भवति । यस्य पुष्टिः "एकः शब्द सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्त स्वर्गे लोके च कामदुग्धा भवति" । एतदर्थं शिक्षा एकः वैदिकशब्दः। यस्य सर्वप्रथमप्रयोगः ऋग्वेदेषु अभवत्।

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

"शिक्ष विद्योपादाने" इति धातोः टाप् प्रत्ययात् शिक्षा इति शब्दः निष्पन्नः। तदनुसारं शिक्षयते उपादीयते विद्या यया सा शिक्षा । अर्थात् येन विद्या उपार्जनं क्रियते, सा अज्ञानरूपि बन्धनात् मुक्तिप्रदात्री भवति । अत्रोच्यते - "सा विद्या या विमुक्तये"। मोक्षः पुरुषार्थचतुष्टयस्य अन्तिमपरिणतिः भवति। "मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः" इति अमरसिंहमतानुसारं मोक्षविषयकबुद्धिः ज्ञानं तथा शिल्पशास्त्रविषयकबुद्धिः विज्ञानमिति उच्यते। ज्ञानविज्ञानयोः संयोगेन व्युत्पन्ना बुद्धिः सद्बुद्धिः भवति। वस्तुतः संस्कारात् प्राक् ब्राह्मणोऽपि शूद्रायते, शिक्षैव तस्य स्वभावं शुद्धं सुसंस्कृतकारयित्वा द्विजत्वं दापयति ।

**शिक्षा-** व्यक्तेः अन्तः स्थितयोग्यतासामर्थ्ययोश्च अभिव्यञ्जनमेव शिक्षा। यतो हि व्यक्तित्वस्य सर्वाङ्गीणभिवृद्धिरेव शिक्षाया उद्देश्यम् । बालके विद्यमानाः क्षमताः योग्यताश्च काः, स कस्यां दिशि प्रगतिं प्राप्नोति, मानवसमाजस्य कृते सः कीदृशरीत्या उपयोगी भवितुमर्हति, सः सरलतया अधिगमे कथं समर्थो भवति, बालकानां वैयक्तिकविभिन्नताः काः सन्ति, मानसिकयोग्यतायाः आधारेण छात्राणां वर्गीकरणं कथं सम्भवेत्, विशिष्टबालकानां शिक्षाव्यवस्था कथं स्यात् इत्यादीनां समस्यानां समाधानं शिक्षामनोविज्ञानेनैव सम्भवति ।

**मनोविज्ञानम् -** साम्प्रतम् अधिगम प्रदानस्यापेक्षया स्वतः अधिगमस्य (Self Learning) योग्यतोपरि बलं दीयते। तदर्थं प्रत्येकं बालकस्य शिक्षणाय वैयक्तिकावधानं परमावश्यकम् । व्यक्तिगतशिक्षणं शिक्षामनोविज्ञानेनैव सम्भवति। शिक्षायाः उद्देश्यमस्ति यत् बालके सक्रियतया जन्मजातशक्तीनां विकासकरणमेव । अतएव शिक्षाप्रदानस्य प्रक्रिया अपि जटिला सञ्जाता । अतः एतादृश्यां परिस्थितौ अध्यापकानां कर्तव्यं भवति यत् ते बालकस्य शारीरिक - मानसिक - योग्यता - रुचिनामध्ययनं कृत्वा तस्य क्षमतानां योग्यतानाञ्चानुरूपेण शिक्षयेयुः।

कार्येऽस्मिन् स एव अध्यापकः सफलो भवितुमर्हति यः बालकस्य शिक्षामनोविज्ञानं जानाति । तदर्थमेव अध्यापकप्रशिक्षणे शिक्षामनोविज्ञानस्याध्ययनम् आवश्यकम्। न केवलमिदमेव किन्तु बुद्धेः, अभिरुचेः, व्यक्तित्वस्ययोग्यतानाञ्च मापने बालकानां शैक्षिकव्यावस्यायिक-निर्देशने चापि शिक्षा मनोविज्ञानस्याध्ययनमावश्यकम् ।

मानवीयव्यवहारं परिशीलयति मनोविज्ञानशास्त्रम् । शिक्षा व्यवहारस्य विपरिणाम सम्पादने महत्वपूर्णं साधनं भवति । अतः अनयोर्मध्ये अत्यन्त निकटतमः सम्वन्धः वर्त्तते। बालमनोविज्ञानं विना अध्यापकैः स्वीय कार्यं सुष्ठु सम्पादयितुं न शक्यते । स्वाभिलषितरीत्या छात्रेषु व्यवहारसंपादनाय मनोविज्ञानस्य ज्ञानमनिवार्यं भवति।

प्राचीनभारते यद्यपि मनोविज्ञानम् इति नाम्ना न कोऽपि ग्रन्थः उपलभ्यन्ते स्म, तथापि आधुनिक काले मनोविज्ञानम् इति ये आंशाः प्रतिपादिताः प्रतिपाद्यमानाश्च वर्तन्ते, ताः अंशाः प्राचीन भारते तत्र तत्र वर्णिताः उपलभ्यन्ते ।

मानवीयव्यवहारपरिशीलनं शास्त्रं मनोविज्ञानमिति उच्यते । मनोविज्ञानं व्यवहारस्य अध्ययनं करोति । तत्रापि शिक्षावमनोविज्ञानस्य प्रधानमुद्देश्यं वर्तते यत् शिक्षकः विभिन्नस्तरेषु अध्ययनरतछात्राणां व्यवहारस्य अवगमनं नियन्त्रणञ्च कर्तुं समर्थः भवेत्। तदर्थं शिक्षामनोविज्ञानं छात्राणां व्यवहारस्याध्ययनाय (दत्तांशसंग्रहणाय) विविधपद्धतीः तंत्राणि चाश्रयति ।

वस्तुतः मनोविज्ञानस्य शिक्षामनोविज्ञानस्य च पद्धतयः समानाः वर्तन्ते। मनोविज्ञानं दर्शनात् प्रथग्भूय स्वतन्त्रशास्त्रत्वेन विकासमाप्नोति, ततः प्रभृति मनोविज्ञानस्य विविधपद्धतीनां विकासः अभूत् । एतासां पद्धतीनां ज्ञानं छात्राणां व्यवहारावगमने अध्ययने च शिक्षकेभ्यः अत्यन्तमुपकरोति । ताः यथा-

1. अन्तर्निरीक्षणम् - Introspections
2. निरीक्षणम् - observation
3. व्यक्तिवृत्ताध्ययनम् - case steady
4. प्रायोगिक पद्धतिः Experimental study
5. मनोविश्लेषणपद्धतिः - psycho analytic method

6. चिकित्सापद्धतिः- clinical method

**निरीक्षणविधिः-** वस्तुतः एतास्सर्वाः पद्धतयः निरीक्षणस्य प्रकारा एव । निरीक्षणस्य परिस्थितिः, प्रक्रमः आवश्यकोपकरणानाम् आधारेण विविधपद्धतयः समुद्भूताः । यथा - काचित् व्यक्तिः स्वव्यवहारस्य निरीक्षणं स्वयं करोति चेत् आत्मावलोकनम् इति कथ्यते । काचित् व्यक्तिः अन्यस्य निरीक्षणं करोति चेत् निरीक्षणपद्वतिः इत्युच्यते।

निरीक्षते अनेन इति निरीक्षणम् । निरीक्षणं नाम सम्यक्तया अवलोकनम् । उदाहरणमेकं दीयते यत् -

**पश्य लक्ष्मण पम्पायां बकः परमधार्मिकः ।**

**मन्दं मन्दं पदं धत्ते जीवानां वधशंकया ॥**

निरीक्षणं द्विविधं भवति ।

1.अन्तर्निरीक्षणम्

2.वाह्यनिरीक्षणम्

आत्मनि आत्मनः अवलोकनं भवति अन्तर्निरीक्षणम् । अपरस्य जनस्य व्यवहारं दृष्ट्वा तस्मिन् विषये तादृशी धारणोत्पादनं भवति वाह्यनिरीक्षणम् । अस्मिन् निरीक्षणे निरीक्षणकर्ता निरीक्षस्य व्यवहारं सम्यकत्या अवलोकयति । तत्पश्चात् तस्य व्यवहारं दृष्ट्वा आत्मनि अवलोकनं कृत्वा तस्मिन् विषये तादृशी धारणाम् उत्सादयति।

निरीक्षणस्य प्रकाराः-

1.साक्षात् निरीक्षणम्

2.परोक्षेण निरीक्षणम्

3.स्वाभाविक निरीक्षणम्

4.कृत्रिमनिरीक्षणम्

5.भागग्रहणसहित निरीक्षणम्

6.भागग्रहणरहित निरीक्षणम्

7.निश्चितावधि निरीक्षणम्

8.अनिश्चितावधि निरीक्षणम्

पूर्वयोजनामाश्रित्य निरीक्षणस्य भागद्वयं वर्तते । यथा-

1.औपचारिकनिरीक्षणम् - (Formal observation)

2. अनौपचारिक निरीक्षणम् - (Non-Formal Observation)

**औपचारिकनिरीक्षणम् -** अत्र निरीक्षणार्थं पूर्वं सूचना दीयते। तथा सूचनया निरीक्षमाणव्यक्तिः पूर्वं सिद्धः भवति । परन्तु एवंविध निरीक्षणेन निरीक्षमाण व्यक्तिः तस्मिन् दिने विशेषतया ध्यानं ददाति। अतः अनेन वास्तविक ब्यवहारस्य अवगमनं कदाचित् न सम्भवति ।

**अनौपचारिक निरीक्षणम्**

निरीक्षणेऽस्मिन् पूर्ववत् योजना सूचना वा न दीयते। निरीक्षकः यदाकदापि प्राकृतिक वातावरणे पूर्वसूचनां विनैव स्वाभिष्टांशानां निरीक्षणं करोति । अस्यां परिस्थितौ व्यक्तेः वास्तविकव्यवहारस्य निरीक्षणं सम्भवति ।

पुनश्च निरीक्षणावसरे निरीक्षकस्य भूमिकामाश्रित्य निरीक्षणस्य दौ प्रकारौ स्तः। तौ यथा-

1.सहभागिनिरीक्षणम् (Participant observation)

2. असहभागिनिरीक्षणम् (Non-Participant Observation)

**सहभागिनिरीक्षणम्-** निरिक्षक: निरीक्षमाण व्यक्तिसमूहे सदस्य भूत्वा अन्येषां व्यवहारस्य निरीक्षण करोति। यथा- विद्यालये क्रीड़ाध्यापक: छात्राणां क्रीडासामर्थ्यानि ज्ञातुं छात्रै: सह मिलित्वा क्रीडति। एतेन स: प्रत्येक क्रीडकस्य विभिन्न सामयर्थानि न्यूनताश्च ज्ञातुं शक्नोति। परन्तु कदाचित छात्रा: अध्यापकस्य उपस्थितौ वास्तविक व्यवहारं न प्रदर्शयेयु: ।

**असहभागिनिरीक्षणम्**

एतादृशनिरीक्षणे निरीक्षक: दूरे स्थित्वा व्यवहारस्य निरीक्षण करोति । अत्र निरीक्षमाण व्यक्तय: आत्मन: निरीक्षणं प्रचलतीति न जानियु: । निरीक्षकोऽपि योग्यस्थानं चिनुयात्, येन निरीक्षमाणा: द्रष्टुं न शक्नुवन्ति । कदाचित् एकपार्श्वे काच: (one side glass) अथवा जवनिका अथवा दूरदर्शकम् (Telescope) इत्यादिन् उपयुङ्क्ते ।

आवश्यकतानुसारं Tape recorders, Video recorder, CCTV इत्याद्याधुनिकसाधनानां प्रयोगोऽपि कर्तुमर्हति । एतैरुपकरणै: निरीक्षणे वस्तुनिष्ठता, वैधता च वर्धते ।

अनेन प्रकारेण अध्यापकस्य कृते मनोवैज्ञानिकविधिषु निरीक्षणविधे: आवश्यकता महत्वं च वर्तते । निरीक्षणं विना न कोऽपि अध्यापक: छात्रस्य वास्तविक व्यवहार: समस्या वा ज्ञातुं प्रभवति । एवं च समस्याया: ज्ञानं विना तस्या: निदानं नैव भवितुमर्हति । अत: निरीक्षणविधे: वैशिष्ट्यं मनोविज्ञाने वरीवर्ती ।

**सन्दर्भग्रन्थसूची: -**


1. शिक्षामनोविज्ञानम् - पि. नागमुनिरेडि- रा.सं.विद्यापीठम् तिरुपति- 2008 ।
2. शिक्षामनोविज्ञानम्- डा. फतेहसिंह:- आदित्यप्रकाशनम् जयपुरम्-2013 ।
3. शिक्षाया: मनोवैज्ञानिकध्यारा: - वि.पि. एम्. श्रीनिवास:, जगदीशसंस्कृत पुस्तकालय:, जयुपुरम् 2012।
4. शिक्षामनोविज्ञानम् - S.K. Mongal - PHI Learning.... Pvt. New Delhi.